॥ श्री गुरुभ्यो नमः ॥

श्री काञ्चीकामकोटिपीठाधिपति जगद्गुरु श्रीजयेन्द्रसरस्वती

śrī kāñcīkāmakoṭipīṭhādhipati jagadguru śrījayendrasarasvatī

श्रीपादानां श्रीचरणयोः नमः पूर्विका पुष्पाञ्जलिः।

śrīpādānāṁ śrīcaraṇayoḥ namaḥ pūrvikā puṣpāñjaliḥ |

जयाख्यया प्रसिद्धेन्द्रसरस्वत्यै नमो नमः।

jayākhyayā prasiddhendra-sarasvatyai namo namaḥ |

तमोऽपहग्रामरत्न सम्भूताय नमो नमः।

tamo'paha-grāma-ratna sambhūtāya namo namaḥ |

महादेव महीदेवतनूजाय नमो नमः।

mahādeva mahīdeva-tanūjāya namo namaḥ |

सरस्वतीगर्भशुक्तिमुक्तारत्नाय ते नमः।

sarasvatī-garbha-śukti-muktā-ratnāya te namaḥ |

सुब्रह्मण्याभिधानीत कौमाराय नमो नमः।

subrahmaṇyābhidhānīta kaumārāya namo namaḥ |

मध्यार्जुनगजारण्याधीतवेदाय ते नमः।

madhyārjuna-gajāraṇyādhīta-vedāya te namaḥ |

स्ववृत्तप्रीणिताशेषाध्यापकाय नमो नमः।

svavṛtta-prīṇitāśeṣādhyāpakāya namo namaḥ |

तपोनिष्ठगुरुज्ञात वैभवाय नमो नमः।

taponiṣṭha-guru-jñāta vaibhavāya namo namaḥ |

गुर्वाज्ञापालनरत पितृदत्ताय ते नमः।

gurvājñā-pālana-rata pitṛ-dattāya te namaḥ |

जयाब्दे स्वीकृत तुरीयाश्रमाय नमो नमः। १०।

jayābde svīkṛta turīyāśramāya namo namaḥ | 10 |

जयाख्यया स्वगुरुणा दीक्षिताय नमो नमः ।

jayākhyayā svaguruṇā dīkṣitāya namo namaḥ ।

ब्रह्मचर्यादेव लब्धप्रव्रज्याय नमो नमः ।

brahmacaryādeva labdha-pravrajyāya namo namaḥ ।

सर्वतीर्थतटे लब्ध चतुर्थाश्रमिणे नमः ।

sarva-tīrtha-taṭe labdha caturthāśramiṇe namaḥ ।

काषायवासस्संवीत शरीराय नमो नमः ।

kāṣāya-vāsassaṁvīta śarīrāya namo namaḥ ।

वाक्यज्ञाचार्योपदिष्ट महावाक्याय ते नमः ।

vākyajñācāryopadiṣṭa mahā-vākyāya te namaḥ ।

नित्यं गुरुपदद्वन्द्वनतिशीलाय ते नमः ।

nityaṁ gurupada-dvandva-natiśīlāya te namaḥ ।

लीलया वामहस्ताग्र धृतदण्डाय ते नमः ।

līlayā vāma-hastāgra dhṛta-daṇḍāya te namaḥ ।

भक्तोपहृत बिल्वादि मालाधर्त्रे नमो नमः ।

bhaktopahṛta bilvādi mālā-dhartre namo namaḥ ।

जम्बीरतुलसीमालाभूषिताय नमो नमः ।

jambīra-tulasī-mālā-bhūṣitāya namo namaḥ ।

कामकोटिमहापीठाधीश्वराय नमो नमः । २० ।

kāmakoṭi-mahā-pīṭhādhīśvarāya namo namaḥ । 20 ।

सुवृत्त नृ हृदाकाशनिवासाय नमो नमः ।

suvṛtta nṛ hṛdāakāśa-nivāsāya namo namaḥ ।

पादानत जन क्षेम साधकाय नमो नमः ।

pādānata jana kṣema sādhakāya namo namaḥ ।

ज्ञानदानोत्क मधुर भाषणाय नमो नमः ।

jñāna-dānotka madhura bhāṣaṇāya namo namaḥ ।

गुरुप्रिया ब्रह्मसूत्र वृत्तिकर्त्रे नमो नमः ।

guru-priyā brahma-sūtra vṛtti-kartre namo namaḥ ।

जगद्गुरुवरिष्ठाय महते महसे नमः ।

jagadguru-variṣṭhāya mahate mahase namaḥ ।

भारतीय सदाचार परित्रात्रे नमो नमः ।

bhāratīya sadācāra paritrātre namo namaḥ ।

मर्यादोल्लङ्घि जनता सुदूराय नमो नमः ।

maryādollaṅghi janatā sudūrāya namo namaḥ ।

सर्वत्र समभावाप्त सौहृदाय नमो नमः ।

sarvatra sama-bhāvāpta sauhṛdāya namo namaḥ ।

वीक्षाविवशिताशेष भावुकाय नमो नमः ।

vīkṣā-vivaśitāśeṣa bhāvukāya namo namaḥ ।

श्रीकामकोटि पीठाग्र्यनिकेताय नमो नमः । ३० ।

śrīkāmakoṭi pīṭhāgrya-niketāya namo namaḥ । 30 ।

कारुण्यपूर पूर्णान्तःकरणाय नमो नमः ।

kāruṇya-pūra pūrṇāntaḥkaraṇāya namo namaḥ ।

चन्द्रशेखर चित्ताब्जाह्लादकाय नमो नमः ।

candra-śekhara cittābjāhlādakāya namo namaḥ ।

पूरित स्वगुरूत्तंस सङ्कल्पाय नमो नमः ।

pūrita svagurūttaṁsa saṅkalpāya namo namaḥ ।

त्रिवारं चन्द्रमौलीश पूजकाय नमो नमः ।

trivāraṁ candra-maulīśa pūjakāya namo namaḥ ।

॥ श्री गुरुभ्यो नमः ॥

कामाक्षीध्यान संलीन मानसाय नमो नमः ।

**kāmākṣī-dhyāna saṁlīna mānasāya namo namaḥ |**

सुनिर्मितस्वर्णरथ वाहिताम्बाय ते नमः ।

**sunirmita-svarṇa-ratha vāhitāmbāya te namaḥ |**

परिष्कृताखिलाण्डेशी ताटङ्काय नमो नमः ।

**pariṣkṛtākhilāṇḍeśī tāṭaṅkāya namo namaḥ |**

रत्नभूषित नृत्येश हस्तपादाय ते नमः ।

**ratna-bhūṣita nṛtyeśa hasta-pādāya te namaḥ |**

वेङ्कटाद्रीश करुणा प्लाविताय नमो नमः ।

**veṅkaṭādrīśa karuṇā plāvitāya namo namaḥ |**

काश्यां श्रीकामकोटीशालयकर्त्रे नमो नमः । ४० ।

**kāśyāṁ śrīkāmakoṭī-śālaya-kartre namo namaḥ | 40 |**

कामाक्ष्यम्बालय स्वर्णच्छादकाय नमो नमः ।

**kāmākṣyambālaya svarṇa-cchādakāya namo namaḥ |**

कुम्भाभिषेक सन्दीप्तालयव्राताय ते नमः ।

**kumbhābhiṣeka sandīptālaya-vrātāya te namaḥ |**

कालट्यां शङ्करयशः स्तम्भकर्त्रे नमो नमः ।

**kālaṭyāṁ śaṅkara-yaśaḥ stambha-kartre namo namaḥ |**

राजराजाख्य चोलस्य स्वर्णमौलिकृते नमः ।

**rāja-rājākhya colasya svarṇa-mauli-kṛte namaḥ |**

गोशाला निर्मितिकृत गोरक्षाय नमो नमः ।

**gośālā nirmiti-kṛta go-rakṣāya namo namaḥ |**

तीर्थेषु भगवत्पादस्मृत्यालयकृते नमः ।

**tīrtheṣu bhagavatpāda-smṛtyālaya-kṛte namaḥ |**

सर्वत्र शङ्करमठनिर्वहित्रे नमो नमः ।

sarvatra śaṅkara-maṭha-nirvahitre namo namaḥ |

वेदशास्त्राधीतिगुप्तिदीक्षिताय नमो नमः ।

veda-śāstrādhīti-gupti-dīkṣitāya namo namaḥ |

देहल्यां स्कन्दगिर्याख्यालयकर्त्रे नमो नमः ।

dehalyāṁ skanda-giryākhyālaya-kartre namo namaḥ |

भारतीयकलाचारपोषकाय नमो नमः । ५० ।

bhāratīya-kalācāra-poṣakāya namo namaḥ | 50 |

स्तोत्रनीतिग्रन्थ पाठ रुचिदाय नमो नमः ।

stotra-nīti-grantha pāṭha rucidāya namo namaḥ |

युक्त्या हरिहराभेददर्शयित्रे नमो नमः ।

yuktyā hari-harābheda-darśayitre namo namaḥ |

स्वभ्यस्तनियमोन्नीतध्यानयोगाय ते नमः ।

svabhyasta-niyamonnīta-dhyāna-yogāya te namaḥ |

परधाम पराकाशलीनचित्ताय ते नमः ।

paradhāma parākāśa-līna-cittāya te namaḥ |

अनारत तपस्याप्त दिव्यशोभाय ते नमः ।

anārata tapasyāpta divya-śobhāya te namaḥ |

शमादिषड्गुणयत स्वचित्ताय नमो नमः ।

śamādi-ṣaḍguṇayata svacittāya namo namaḥ |

समस्तभक्तजनता रक्षकाय नमो नमः ।

samasta-bhakta-janatā rakṣakāya namo namaḥ |

स्वशरीरप्रभाधूत हेमभासे नमो नमः ।

svaśarīra-prabhā-dhūta hema-bhāse namo namaḥ |

अग्नितप्तस्वर्णपट्ट तुल्यफालाय ते नमः ।

**agni-tapta-svarṇa-paṭṭa tulya-phālāya te namaḥ |**

विभूति विलसच्छुभ्रललाटाय नमो नमः । ६० ।

**vibhūti vilasacchubhra-lalāṭāya namo namaḥ | 60 |**

परिव्राड्गण संसेव्य पदाब्जाय नमो नमः ।

**parivrāḍ-gaṇa saṁsevya padābjāya namo namaḥ |**

आर्तार्ति श्रवणापोह रतचित्ताय ते नमः ।

**ārtārti śravaṇāpoha rata-cittāya te namaḥ |**

ग्रामीणजनता वृत्तिकल्पकाय नमो नमः ।

**grāmīṇa-janatā vṛtti-kalpakāya namo namaḥ |**

जनकल्याण रचना चतुराय नमो नमः ।

**jana-kalyāṇa racanā caturāya namo namaḥ |**

जनजागरणासक्तिदायकाय नमो नमः ।

**jana-jāgaraṇāsakti-dāyakāya namo namaḥ |**

शङ्करोपज्ञसुपथसञ्चाराय नमो नमः ।

**śaṅkaropajña-supatha-sañcārāya namo namaḥ |**

अद्वैतशास्त्ररक्षायां सुलग्नाय नमो नमः ।

**advaita-śāstra-rakṣāyāṁ sulagnāya namo namaḥ |**

प्राच्यप्रतीच्यविज्ञानयोजकाय नमो नमः ।

**prācya-pratīcya-vijñāna-yojakāya namo namaḥ |**

गैर्वाणवाणीसंरक्षाधुरीणाय नमो नमः ।

**gairvāṇa-vāṇī-saṁrakṣā-dhurīṇāya namo namaḥ |**

भगवत्पूज्यपादानामपराकृतये नमः । ७० ।

**bhagavatpūjya-pādānāmaparā-kṛtaye namaḥ | 70 |**

स्वपादयात्रया पूत भारताय नमो नमः ।

svapāda-yātrayā pūta bhāratāya namo namaḥ ।

नेपालभूपमहित पदाब्जाय नमो नमः ।

nepāla-bhūpa-mahita padābjāya namo namaḥ ।

चिन्तितक्षणसम्पूर्ण सङ्कल्पाय नमो नमः ।

cintita-kṣaṇa-sampūrṇa saṅkalpāya namo namaḥ ।

यथाज्ञकर्मकृद्वर्गोत्साहकाय नमो नमः ।

yathājña-karmakṛdvargotsāhakāya namo namaḥ ।

मधुराभाषणप्रीतस्वाश्रिताय नमो नमः ।

madhurā-bhāṣaṇa-prīta-svāśritāya namo namaḥ ।

सर्वदा शुभमस्त्वित्याशंसकाय नमो नमः ।

sarvadā śubhamastvityāśaṁsakāya namo namaḥ ।

चित्रीयमाणजनता सन्दृष्टाय नमो नमः ।

citrīyamāṇa-janatā sandṛṣṭāya namo namaḥ ।

शरणागतदीनार्त परित्रात्रे नमो नमः ।

śaraṇāgata-dīnārta paritrātre namo namaḥ ।

सौभाग्यजनकापाङ्गवीक्षणाय नमो नमः ।

saubhāgya-janakāpāṅga-vīkṣaṇāya namo namaḥ ।

दुरवस्थितहृत्ताप शामकाय नमो नमः । ८० ।

duravasthita-hṛttāpa śāmakāya namo namaḥ । 80 ।

दुर्योज्य विमत व्रात समन्वयकृते नमः ।

duryojya vimata vrāta samanvaya-kṛte namaḥ ।

निरस्तालस्यमोहाशा विक्षेपाय नमो नमः ।

nirastālasya-mohāśā vikṣepāya namo namaḥ ।

अनुगन्तृ दुरासाद्य पदवेगाय ते नमः ।

anugantṛ durāsādya padavegāya te namaḥ ।

अन्यानाज्ञात सङ्कल्पविचित्राय नमो नमः ।

anyānājñāta saṅkalpa-vicitrāya namo namaḥ ।

सदाहसन्मुखाब्जापनीताशेषशुचे नमः ।

sadā-hasanmukhābjāpanītāśeṣa-śuce namaḥ ।

नवषष्टितमाचार्य शङ्कराय नमो नमः ।

nava-ṣaṣṭitamācārya śaṅkarāya namo namaḥ ।

विविधाप्तजनप्रार्थ्य स्वगृहागतये नमः ।

vividhāpta-jana-prārthya svagṛhāgataye namaḥ ।

जैत्रयात्राव्याजकृष्टजनस्वान्ताय ते नमः ।

jaitrayātrāvyāja-kṛṣṭa-jana-svāntāya te namaḥ ।

वसिष्ठधौम्यसदृशदेशिकाय नमो नमः ।

vasiṣṭha-dhaumya-sadṛśa-deśikāya namo namaḥ ।

असकृत्क्षेत्रतीर्थादि यात्रातृप्ताय ते नमः । ९० ।

asakṛtkṣetra-tīrthādi yātrā-tṛptāya te namaḥ । 90 ।

श्रीचन्द्रशेखरगुरोः एकशिष्याय ते नमः ।

śrīcandraśekhara-guroḥ eka-śiṣyāya te namaḥ ।

गुरोर्हृद्गतसङ्कल्प क्रियान्वयकृते नमः ।

gurorhṛdgata-saṅkalpa kriyānvaya-kṛte namaḥ ।

गुरुवर्यकृपालब्धसमभावाय ते नमः ।

guruvarya-kṛpā-labdha-sama-bhāvāya te namaḥ ।

योगलिङ्गेन्दुमौलीश पूजकाय नमो नमः ।

yoga-liṅgendu-maulīśa pūjakāya namo namaḥ ।

वयोवृद्धानाथजनाश्रयदाय नमो नमः

**vayovṛddhānātha-janāśraya-dāya namo namaḥ**

अवृत्तिकोपद्रुतानां वृत्तिदाय नमो नमः ।

**avṛtti-kopa-drutānāṁ vṛtti-dāya namo namaḥ ।**

स्वगुरूपज्ञया विश्वविद्यालयकृते नमः ।

**svagurūpajñayā viśva-vidyālaya-kṛte namaḥ**

विश्वराष्ट्रीय सद्ग्रन्थकोशागारकृते नमः ।

**viśva-rāṣṭrīya sadgrantha-kośāgāra-kṛte namaḥ ।**

विद्यालयेषु सद्धर्मबोधदात्रे नमो नमः ।

**vidyālayeṣu saddharma-bodha-dātre namo namaḥ ।**

देवालयेष्वर्चकादि वृत्तिदात्रे नमो नमः । १०० ।

**devālayeṣvarcakādi vṛtti-dātre namo namaḥ । 100 ।**

कैलासे भगवत्पाद मूर्ति स्थापक ते नमः ।

**kailāse bhagavatpāda mūrti sthāpaka te namaḥ ।**

कैलास मानस सरोयात्रा पूतहृदे नमः ।

**kailāsa mānasa saroyātrā pūta-hṛde namaḥ**

असमे बालसप्ताद्रिनाथालयकृते नमः ।

**asame bāla-saptādri-nāthālaya-kṛte namaḥ ।**

शिष्टवेदाध्यापकानां मानयित्रे नमो नमः ।

**śiṣṭa-vedādhyāpakānāṁ mānayitre namo namaḥ ।**

महारुद्रातिरुद्रादि तोषितेशाय ते नमः ।

**mahā-rudrātirudrādi toṣiteśāya te namaḥ**

असकृच्छतचण्डीभिः अर्हिताम्बाय ते नमः ।

**asakṛcchata-caṇḍībhiḥ arhitāmbāya te namaḥ ।**

द्रविडागमगातॄणां ख्यापयित्रे नमो नमः ।

**draviḍāgama-gātṝṇāṁ khyāpayitre namo namaḥ |**

शिष्टशङ्करविजयस्वर्च्यमानपदे नमः । १०८ ।

**śiṣṭa-śaṅkara-vijaya-svarcyamāna-pade namaḥ | 108 |**

परित्यज्य मौनं वटाधःस्थितिं च

**parityajya maunaṁ vaṭādhaḥsthitiṁ ca**

व्रजन् भारतस्य प्रदेशात्प्रदेशम् ।

**vrajan bhāratasya pradeśātpradeśam |**

मधुस्यन्दिवाचा जनान्धर्ममार्गे

**madhu-syandivācā janāndharma-mārge**

नयन् श्रीजयेन्द्रो गुरुर्भाति चित्ते ॥

**nayan śrījayendro gururbhāti citte | |**